शब्दलभ्यमित्यर्थः सूत्रबोध्य इति भावः। श्रुतिगम्यं श्रुतिलभ्यमानुपूर्व्यं ग्राह्यमिति शेषः। "अथ अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति" इत्यादौ दीक्षैव विधीयते श्रुतितस्तद्विध्यवगमात् क्रमस्तु वाक्यार्थो न विधेय इति। तद्विध्यवगमाभावात् तदुक्तं "वाक्यार्थो विधिरन्याय्यः श्रुत्यर्थविधिसम्भवे। तस्माद्दीक्षाविधिः पाठाद्दीक्षाणां प्राप्यते क्रमः"। उच्यते। द्वादशाहसत्रे य एव यजमानास्तएव ऋत्विजः" इति ब्रह्मादीनां सर्वेषामृत्विजां यजमानत्वेन यजमानदीक्षां विधिप्राप्तामनूद्य अनेनाप्राप्तक्रमएव विधीयते। तदुक्तं "सर्वेषां यजमानत्वात् दीक्षाप्राप्तेरचोदनात्। क्रमस्तु नान्यतः प्राप्त इति सोऽत्र विधीयते"।

"अर्थाच्चेति" सूत्रम्। २अर्थात् यथाग्निहोत्रं जुहोति यवागूं पचतीत्यत्र यवागूपाकस्य होमः प्रयोजनं तच्च होमानन्तरपाके सति न सम्भवति होमोऽपिच यवागूं विना न निष्पद्यत इति पाकानन्तरं होमः। अतएव गृहपत्यादिदीक्षासु पाठप्राप्तक्रमस्यैवादृतत्वात् इहापि होमपाकयोः पाठप्राप्तक्रमोग्राह्य इति निरस्तं पाठक्रमग्रहणे विहितार्थानिष्पत्तेः। न च जुहोतीत्यस्य सामान्यप्राप्ताज्यादिद्रव्यकत्वमिति द्रव्यान्तरेण होमः, यवागूपाकस्य च ऋत्विग्भक्षादिरूपप्रयोजनान्तरं कल्पनीयम् अथवा यवागूमित्यस्य जुहोतीत्यनेनान्वयात् पचतीत्यस्य कर्म्मान्तरमध्याहार्य्यमिति वाच्यं तत्कल्पकाभावात् गौरवात् विलम्बोपस्थितेः। द्वितीये यवाग्वाहोमद्रव्यत्वाङ्गीकारेणार्थक्रमस्याभ्युपगमाच्च यवागूं जुहोतीत्यन्वये पाकं विना यवाग्वाअसम्भवेन पाकस्यावश्यकत्वाच्च। अत एवार्थक्रमः पाठक्रमाद्बलवान् जुहोतीत्यनेनाकाङ्क्षितद्रव्यान्तरसाध्यहविरादिना होमनिश्चयात् तत्र प्रवृत्तिः यवागूपाकस्य च प्रयोजनान्तरमवगत्य तदर्थं पाके प्रवृत्तिरिति तादृशावगमस्य कल्पनासापेक्षत्वेन विलम्बितत्वात् आसत्तिवशात् यवागूमित्यनेन जुहोतीत्यस्यान्वयात् यवागूपाकस्य होमप्रयोजनकत्वास्य झटित्यवगमात्। अर्थात् युक्तेरिति कश्चित् तन्न। पठन स्थानादीनामपि युक्तिलभ्यत्वेन विभागानुपपत्तेः। अतएव प्रयोजनवशात्तु नियम इति शास्त्रदीपिका। माधवाचार्य्यस्तु "यवागूं पचति यवाग्वाग्निहोत्रं जुहोतीति श्रुतिमभिधाय तृतीयया यवाग्वाहोमसाधनत्वमवगम्यत इत्याह।

३पठनाद्यथा "समिधोयजति तनूनपातं यजतीत्यादिषु दर्शपौर्णमासाङ्गप्रयाजादिषु क्रमपठितानां क्रमेणानुष्ठानम्। नन्वत्र गृहपत्यादिदीक्षायामिव क्रमबोधकशब्दाभावात् यवागूपाकस्येव साध्याभावाच्च कथं क्रमनियम इति चेत् न, तथैव लोकप्रतिपत्तेः। तथा च सूत्रं "क्रमेण वानियम्येत क्रत्वेत्वे तद्गुणत्वात्"। तदुक्तं "यथापाठमनुष्ठानं तथैव प्रतिपत्तितः। स्मृतिप्रयोगवेलायां वाक्यैरेव च कर्म्मणाम्"। आसनं स्वागतमित्यादिषु क्रमपाठस्थेषु आसनादिषु गन्धपुष्पादिषु तथैवानुष्ठानं लौकिकाः प्रतिपद्यन्ते। अयं स्थानादिक्रमतोबलवान् तदपेक्षया शीघ्रोपस्थितेः।

४स्थानाद्यथा। साद्यस्क्रनामकः कश्चिद्यागविशेषः ज्योतिष्टोमविकृतिः। तत्र श्रूयते "सह पशूनालभते" इति तत्र च प्रकृतियागज्योतिष्टोमे अग्नीषोमीयपशुरौपवसथ्यपूर्व्वदिने आलभ्यते, सवनीयः पशुः सुत्यादिने प्रातःसवने आश्विनग्रहग्रहणादूर्द्ध्वमालभ्यते तथा च श्रुतिः "आश्विनग्रहं गृहीत्वा त्रिवृता यूपं परिवीय सवनीयमाग्नेयं पशुमुपाकरोतीति" अनुबन्ध्यपशुरौपवसथ्यादूर्द्ध्वमालभ्यते विकृतौ सायस्क्रे त्रयोऽपि पशवः सहालभ्यन्ते सहालभनमेकस्मिन् सवनीयस्थाने सुत्यादिने आलभनं तत्र च प्रकृतौ ज्योतिष्टोमे अग्नीषोमीयस्य प्रथममुपाकरणं ततोविकृतावपि अग्नीषोमीयस्य प्रथममुपाकरणमिति प्राप्ते "स्थानाच्चोत्पत्तिसंयोगात्" उत्पत्तिसंयोगात्। उत्पत्तिवाक्यात् प्राप्तात् स्थानात् उपाकरणस्थाने प्रथमं सवनीयपशोरालभनीयत्वेन सवनीयपशोः स्थानप्राथम्यात्। तथाचोक्तं सह पशुना आहतपरिपाट्या पशुना सह कार्य्यः" अयम्भावः सवनीयपशोः स्थानमपि ग्रहसमीपम् अन्ययोस्तु अन्यत्, तत्र प्रकृतौ "आश्विनग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयपशुमुपाकरोतीति" श्रूयते त्रिवृता कुशमेखलया त्रिराहृत्त्या परिवीय संवेष्ट्य इत्यर्थः। अत्र प्रकृतौ तथा श्रुतेस्तदतिदेशात् विकृतावपि सवनीयपशूपाकरणात् पूर्व्वमाश्विनग्रहो ग्राह्यः। ततश्च गृहीते तस्मिन् समीपे स्वस्थानस्थितस्य सवनीयपशोरेव प्रथममुपस्थितिस्तस्यैव प्रथममुपाकरणं न तु प्रकृतौ प्रथममुपाकरणमग्नीषोमीयपशोः, तस्य प्रथममनुपस्थितेः इतरयोः सहोपाकरणानुरोधात् स्वस्थानात् सवनीयपशोः स्थानादितरयोरपि स्वस्थानभ्रष्टयोः सतोः